[1]चेतयमानः,[A] चिचेतयिषमाणः ; चेतयिष्यमाणः, चिचेतयिषिष्यमाणः ;
चेत्-चेतौ-चेतः ; — — —
चेतितम्-तः, चिचेतयिषितः-तवान् ; चेतः, [2]चेतयः, [3]चेतनः, चिचेतयिषुः ;
चेतयितव्यम्, चिचेतयिषितव्यम् ; चेतनीयम्, चिचेतयिषणीयम् ; चेत्यम्,
चिचेतयिष्यम् ; ईषच्चेतः-दुश्चेतः-सुचेतः ;
चेत्यमानः, चिचेतयिष्यमाणः ; चेतः, चिचेतयिषः ;
चेतयितुम्, चिचेतयिषितुम् ; चेतना, चिचेतयिषा ;
चेतनम्, चिचेतयिषणम् ; चेतयित्वा, चिचेतयिषित्वा ;
प्रचेत्य, प्रचिचेतयिष्य ; चेतम् २, } चिचेतयिषम् २ ; }
चेतयित्वा २, } चिचेतयिषित्वा २. }

(523) " चिति स्मृत्याम् " (X-चुरादिः-1535. सक. सेट्. उभ.)

'— — चिन्तयेत् ।
स्मृत्याम् , चेतति संज्ञाने, तत्र चेतयते णिचि ॥'
(श्लो. 94) इति देवः ।

इदित्करणात् णिचो वैकल्पिकत्वम् ।

[4]चिन्तकः-न्तिका, चिचिन्तयिषकः-षिका, [5]चिन्तकः-न्तिका,
चिचिन्तिषकः-षिका, चेचिन्तकः-न्तिका ;
चिन्तयिता-त्री, चिचिन्तयिषिता-त्री, चिन्तिता-त्री, चिचिन्तिषिता-त्री,
चेचिन्तिता-त्री ;

---

1. 'आ कुस्मादात्मनेपदिनः' (ग. सू. - चुरादौ) इति ण्यन्तादात्मनेपदमेव ।
2. 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' (3-1-138) इति कर्तरि शप्रत्ययः । गुणायादेशौ ।
3. बाहुलकात् नन्द्यादित्वेन (3-1-134) कर्तरि ल्युः । **चेतनः**=जीवः ।
4. धातोरिदित्वात् , 'इदितो नुम् धातोः' (7-1-58) इति नुमि, 'णेरनिटि' (6-4-51) इति णिलोपे रूपम् । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
5. इदित्करणाण्णिचो वैकल्पिकत्वम् । तेन णिजभावपक्षे, शुद्धाद्धातोः, सन्नन्तात् , यङन्ताच्च रूपाणि प्रदर्शितानि ।
'केचित् सर्वचुरादीनामनित्यण्यन्ततां जगुः । [3-13.
येषां विकल्पचिह्नं स्यात् तेषामेवेति **माधवः**॥' इति **धातुकाव्यव्याख्याने**